त्यप्यसंभावनादिनाक्वापि कदाचिदपि काप्यि दायिनास्तिनइत्येवं रूपेणाभिभूतत्वाद्प्राप्तिरेवेति वाच्यं असंभाव
नादिमात्रेण प्राप्तौ देवार्गगागतस्य गंगासंभावनाविराहितस्य नास्तिकस्यापि तद्प्राप्तिप्रसंगात् यदेकदोषेणान्यप्राप्ति
तर्वेनवदति तर्हि परत्र जीवमात्रस्य सर्वेषां दोषाणां भावितत्वया शिष्यप्रत्ययपिकेनचिद्दोषेणनैव चवदतीत्यभिप्रेत्याहपुनः
दूर्ववादी गावैकोऽइति असंभावनादयएवाधिकतरदोषास्तान प्रतिवंधकत्वात् तेषां तेचानधिकारिणएव भवंति तत्त्वविवेका
दिविशेषणेवत्त्वधिकारिणः तत्राप्रेतज्ञानानि वर्णतिभा ॥

निष्ठेत्यादिव्यवहारहेतोरभानापादकादज्ञानादेर्निवृत्तेर्दोषाभावात् अन्ये च वदन्तीत्यभिप्रायेणाह वेषेहाररराद्धहररत्नि अत्रा
ज॰टी॰ हारररपदमपरोतत्वब्रह्मपरं नघाचयोब्रह्मविद्गममपरोतं ब्रह्मय एव निब्रह्मविद्गुरुत्वेति अनेन मम गुरुर्ब्रह्मैवेति प्रत्ययेतित स्तुतमा
१९ पिकारिणं प्रतिसोप्यपरोतत्वब्रह्म गायतीत्यत्रार्थः गायतिपदस्य संबंधः सर्वत्र पूर्वपरपतयोरुभयोरपि द्रष्टव्यः ननु कियता
पूर्वाचार्याणां ब्रह्मनिष्ठगुरूणां स्वीयान् शिष्यान् प्रत्यासीत् कियत्त्वानन्तविषयो कि इत्यत आह कथनाइति स्वशिष्यान्
प्रतितत्त्वकथनस्य वक्तृणामाचार्याणां चोवर्धितानागक्षेदित्यत्रार्थः नत्रहनुमाह कथेति अत्र प्रथमं कथपदं कथनीयत
त्वपरं द्वितीयं च कथनपरं कथ्योपदेवक्तृगुरुपरं कोटि नयपदं अनेकमसंहितं समन्दपरमितपरमितिभेदः तथा च क

कथनाकथीनत्राविनोट कथकथकथीकोटीकोटिकोटि देदादेलैदेथकपाहि ॥

थनीयतत्वस्यतत्वकथनस्य तत्कथनवतां चापरितत्वादित्यर्थः आचार्यैः कथनीयस्य तत्त्वस्यापरमितत्वं नाम शाहशब्दापरिच्छे
घ द्यत्वं यतो वाचो निवर्तन्त इत्यादिश्रुतेः भूतभाविवर्तमानानन्तानां अनेत्रब्रह्मनिष्ठतयान्नविद्यायै शिष्यानुशासनवतां ब्रह्मविषया
नुशासनरूपाणां प्रकारभेदेन तदुक्तीनां चापरिमितत्वमसंख्यातरूपमिति बोध्यं ननु शास्त्राधिकारिशुपररूपगुरोः सका
शान्तेन त्वोपदेशांगृह्णतीत्यत आहेदाइति येधिकारिणो निष्कामधर्मप्रयुक्ताश्च अमुमुक्षवो जन्मपरंपरैः संसारमा
गीभ्रुमसुपयातिते कजन्मोयार्जितनिष्कामधर्महेतुकयेस्वरहृपयेष्परनूपालनविदोगुरोः सकाशान्स्वमुत्तवः संतस्तत्त्वो
पदेशांगृह्णनिदाता रापितत्वविनेभ्योधिकारिभ्यं सपत्रेभ्यो ज्ञानतत्वंददातिनान्येभ्यइत्यर्थः ॥ १९

ननु तेभ्यो ज्ञानं त्वं कुतो न ददासि सर्वेष्वपि समदर्शित्वात्तस्येति चेत्तत्राज्ञाननियकारित्वादिनरेषामित्याह जुगा इति अत्र जुगाद्
निपद चतुःसंख्यापरं सत् चतुर्वर्णान् चतुराश्रमांश्च बोधयति षाहीति पदं च ये क्रूतावतीत्याह शब्दनोक्ता अतिमकरा
दिवदंति तेषां हे नु त्वा जीव भाति कांश्च विषयांस्तान्बोधयति जुगांतरपदमपि सत्वादियुगेषु मध्ये रत्वे वें बोधनपरं तथा
च सत्वादियुगेषु मध्ये ये ऽधिकारिणः स्तत्वारावर्णाश्रमाश्रमांस्ते विषयान् अन्तुक्तानि ग्राह्यानपि विवेकेन तत्पर्यंतियंतो न
ते भ्यएव ददानीति हृदैवेण संबंधः प्रयुक्तेनैवकारेण न हि लत्तणोन्यव्याहतिर्वोध्या ननु स्वगुरुहा शिष्यपरंपरयातत्वज्ञानोपदेश
मार्गस्य कः प्रवर्तक इत्यपेक्षायामाह इकमी इति अन्तिमस्य त्वासावानीश्वर एव अन्त्यादिस्वात तयान इक गुरुशिष्यपरंपरयात
त्वज्ञानोपदेशमार्गं प्रवर्तयति परमगुरुणा हरिणाऽपरगभीरेणामपि तस्याज्ञावर्त ईश्वरस्य गुरुत्वादित्यर्थः ननु किं मित्र एव सनु

जुगाजुगंतरषाहीषाह इकमी इकमचलायेराह नानकविगसै वेपरवाह २ सा चासाहि विसा चिनायथा षा भाव अपार

मित्रयात्तयाभित्रं मार्गं चालयति तथा चेद् हदैनापनरित्यत आह नानकरति वस्तुतउक्तप्रकारनानकपदव्याख्यानेन भेदर
हितो हैन एव अनिर्वचनीयया स्वमायया चैतन्यमात्र ईश्वरत्वसंपारकया मनानारूपेण विकसतीवेत्यर्थः किं जीववन्मायया
परितंत्रो नेत्याह वेपरवाहेति स्वतंत्र एवेश्वरः शुद्धसत्वप्रधानत्वात् जीवस्तु मलिनसत्वप्रधानतया मायापरितंत्र
इत्यर्थः ननु स्वतंत्रत्वेन परितंत्रत्वेन रूपेणायमीश्वरजीवयोर्विशेषस्तु मायापरस्यापि केनचिद्रूपेणानाभ्यां विशेषास्ति
न वेति चेत्तत्रास्तीत्याह सा चा इति अत्र साहिबपदं मीशपरं नायपदेन जीवो लक्ष्यते तथा च यः परः देवः स च माया
विशिष्टरूपेण समष्टनात् ईशो भवति स चैव मायाकार्यांतःकरणविशिष्टरूपेण जीवोपि भवति वस्तुतः ईशो जीवो न स्त इत्यर्थः

अ॰दी॰
२०

विशिष्टरूपेणैव भेदो नत्वनुगतविरूपेणेत्याह भाष्याभावइत्यपार इति भाष्येनासमंतादभावेनत्तानाख्येन स्वरूपेण सः
परः अपारः पारो नाम भेदः वस्तुपरिच्छेदस्तद्रहित इत्यर्थः अत्र ज्ञानेन सत्यं ज्ञानमित्यादिश्रुतिप्रमितमनुगतस्फुरणं निम्न
विरूपं विवक्षितं अथवा पूर्वमीश्वरस्यासाधारणसर्वसामर्थ्यहेतुना वेदद्वारा मोक्षमार्गज्ञानसंप्रदायप्रवर्तकत्वमुक्त
मिदानीं साधारणज्ञानसंप्रदायप्रवर्तकत्वहेतौ साक्षात्स्वज्ञानोपदेष्टृत्वे हेतुमाभाष्यमा— सा चासौ हि वइति सा चेति
पदं यथार्थवक्तामगुरूपरं तदुत्तरसाह्विपदमीश्वरपरमुक्तमेव तथा सवनामपदं यथार्थवक्तृरूपाभसत्यभाष
णपरं तथा चेश्वरो यथार्थवक्तृरूपोतः सत्स्तु ज्ञाने सति सत्यभाषणवत्त्वात् आमंत्वनामानधिगतनाबाधितव
स्तुप्रमापकवचनप्रणेतृत्वं तत्रेश्वराचार्यगुरुसाधारण्यव्यापि तथापीश्वरे मुहसत्त्वप्रधानमायापादितसर्वज्ञ
क्तिवविशेष इति बोध्यं ननूक्तवस्तुप्रमापकवचनत्वं वेदस्यैव नतु तदतिरिक्तस्य पौरुषेयतया नहि परीनत्वात् वेदप्रणे
तृत्वं चेश्वरे संभावितयातद्वदिनामत्वं भवतु नाम जीवदेहविशिष्टे श्रोत्रवस्तुनिष्ठरूपेणाचार्ये गुरौ कथं तद्वदने तथे
श्वरत्वाविशिष्टतयानधिगताबाधितवस्तुप्रमापकवेदवचनप्रणेतृत्वासंभवेन तद्रूपस्यानत्वस्पन्तत्राभावादिति
वेदानधिगताबाधितार्थप्रमापकवचनतात्पर्यविवेकस्यैवामत्वस्य विवक्षितत्वात् तदुभयत्रापि तनतर्हि वेदस्याकिं
तात्पर्यंतौ ज्ञानं नइत्यत आह भाष्याभाव इति वेदेन भाषितं योगपः आसमंतात् भावो नामसत्तैव सच पारपदार्थभदरहि
तो भेदप्रतियोगि द्वितीयसद्भावात् भेदस्य च सत्यो भेदो निरूप्यत इति न्यायादुभयसापेक्षत्वात् उभयसत्वे च प्रमाणाभावे
नतद्वादितभेदस्यानुपपन्नतरत्वात् सत्तायाप्यकरूपत्वं सदेव सौम्येदमित्यादिना एकमेवाद्वितीयमित्यनेन नानेकनवाक्येन मातोऽत्र

२०

ननु भवदुक्तास्तानीत्यत्रैव मेमतमित्यादि भगवदुक्त्याचेत्स्वरगुरुवेकरूपो महातात्पर्यज्ञानं वेत्तथापि जिज्ञासत्वद्धवनता
त्पर्यं कथं ज्ञानानीत्यत आह आपदाहि इति तयाप्येष जिज्ञासवः कथं तात्पर्यज्ञानमीतिनिकषंयन्नाचार्यास्तान्प्रतीनिवदामः आ
र्थं न विना कथयंतीत्यत आह मगदोति तेष्व्यसमभ्यं देहि देहि तात्पर्यज्ञानमिति प्रार्थयंतीत्यर्थः नन्वाचार्या अर्थियकिं वि
आर्थयिष्यंतीति चेत्र तेषामामसकामत्वादित्याह दातारेति तेषु शास्त्रविधिना दानमेव ऊर्ध्वं नियतो दातारश्च त्यर्थः नन्वद्वि
तीयब्रह्मणो वेदांततात्पर्यं कथं तेनाधिकारिणा मुमुक्षुणेन तत्र तात्पर्यज्ञानमेवावधिः किमिति पृच्छति फेरकिउने आचार्या
किं पूर्वकाण्डलक्षणो वेदतात्पर्यज्ञानादनन्तरं पुनः किं भवतीत्यर्थः समाधत्ते अगेरतीयजिनदिसेदरबारे इति अवणल

आपहिंमंगादि देहि देहि दानकरे दातार फेरकिउ अगेरतीये जिनदिसे दरबार ॥

तणांतात्पर्यज्ञानादग्रेतामानंतरं आह इति परयोर्मनननिदिध्यासनयोर्दत्वमाणयोः सतोस्तेधिकारिणः स्वाधयंते
याभ्यां श्रवणपूर्वाभ्यां सर्वप्रतिबंधनिराकरणपराभ्यां मनननिदिध्यासनाभ्यां परेष्याने तुरीयाख्यप्रत्यक्तत्त्वं भवती
तर्थः अत्र दरबारपदस्थानविशेषवाचकं पारसीकदेशभाषायां तत्स्थानविशेषे तुरीयाख्यलक्षणया वाच्यापि शिवः
पृच्छति मुहकि वालतणा वोलणा इति मुख्यप्रथमसाधवधिकारिभिः किं वाक्यमुच्यत इत्यत्र राग्र्थः किमित्यस्था
स्वभावः किमवस्थितेना वाक्यमुच्यते तेन वा स्थितं वा नाद्यः शास्त्रीयाधिकारितयाः स्ववस्थितत्वा वाक्यस्य तत्रानुपपत्तेः
द्वितीयेपि किं कर्मविषयं ब्रह्मवाक्यमुच्यते उतोपासनाविषयमाहोस्वित्ज्ञानविषयं तत्र प्रथमेपि किं सकामक
र्मविषयं निष्कामकर्मविषयं वा नाद्यः संसारोपयोगिनः सकामकर्मणो मातेनुपयोगात् नद्वितीयः निष्कामधर्म॥

प्रवृत्तमो — धिकारित्वंप्रामाणेोत्तुत्तर्निक्षामयर्मेप्रहणयेनतत्त्वानार्थतत्त्वचप्रश्नवाक्यायोगात् नाद्यद्वितीयः मध्यमाधिकारिता
ज॰टी॰ योपासनाविषयकप्रश्नवाक्यस्यसंभवेप्युत्तमाधिकारित्वायनदसंभवात् तृतीयेपित्युत्तक्रमेणज्ञानविषकप्रश्नवाक्यं
२२ क्रमेणवाक्रमश्चात्रप्रथमंपदार्थज्ञानविषयकंप्रश्नवाक्यंततोवाक्यार्थज्ञानविषयकं यदार्थबुद्धिपूर्वकत्वाद्वाक्यार्थबु
द्धेः तद्विपरीतोव्युत्क्रमः पदार्थबुद्धिमाक्रमेणत्वप्रश्नवाक्यंविनादुःप्राप्यत्वात् नेषावकयंकोहंशावापदार्थज्ञानविषयंप्र
श्नतः वाक्यमुच्चरितउच्यतेनेतिशिति अत्रोच्यते जिनसूत्रणयरेप्पारइति यथायद्वाक्यंप्रश्नवाणीतियारकालश्चाचार्याः स्तुलणा
त्महाक्यमुच्चातेत्विज्ञासुभिःशिष्यैरित्यत्तरार्थः अयंभावः शिष्येणोक्तेहेभगवन् किंरूपस्त्वत्पदार्थस्त्वंपदार्थश्चेतितन्त्वंपदा

मुहुकिवोलयेजिनसूत्रणयरेप्पार ॥

र्थयोः स्वरूपविषयकंवाक्योटशांतत्पदार्थज्ञानंत्वंपदार्थज्ञानंचेतितज्ज्ञानविषयंवाप्रश्नवाक्यंकार्यंतया अथवातापत्रया
त्कंसंसारात्मकंयममोहहरणाण्यादितिप्रश्नवाक्यंकार्यंतयावुद्धोच्यतेआचार्याअपिसोपपत्तिकमुक्तवाक्यंमाकर्ण्यसाधुसा
धिनेवमन्वमोदनप्रकारकमुपदेशोनुच्चलततणप्रसादापरंपर्यायप्रियत्वयार्थतीति अथवामुहुकिवोलणवोलणजि
नसूत्रणयरेप्पारइत्यस्यमुच्चमादौआचार्यैः किंवाक्यमुच्यतेजिज्ञासुभ्यनीमर्थः किंसगुणवाक्यंविगुणब्रह्मवाक्यंवेति
किंशद्धार्थः नेपुरुषविशेषोपपत्तेः परमार्थिकाद्वैततत्वेऽपिवापितानुवृत्त्याव्यावहारिकपुरुषविशेषस्तेषंप्राधिकारमेवा २२
श्रियतेवाक्यमित्यभिप्रायेणसमाधत्ते जिनसूत्रणयरेइति यत्सगुणब्रह्मवाक्यंनिर्गुणब्रह्मवाक्यंवायथाधिकारस्फु
तानदर्थंप्रवयारयतिप्रेमतः पुरुषस्तद्वाक्यमेवप्रथमंतेवुवंतिवाकाकुशलाइत्यर्थः ॥

ननु तथापि जिज्ञासुनाचार्यसंसर्गोत्पत्त्यतिरेककाले किं विचारणीयमिति चेत्तद्दर्शयति अमृतेति अमृतस्य मोक्षस्य वेला विचा
रणीया शास्त्रीयत्वुष्माकं स्या वेलायां पुरुषस्य मोक्षो भवतीति परामृश्य च यदा सर्वे प्रमुच्यन्ते कामा येस्य हृदि स्थिताः अथ म
र्त्योमृतो भवत्यत्र ब्रह्म समश्नुत इत्यादिश्रुत्या ज्ञानकाल एव मोक्षस्तमवधारयति पुनः किं विचारणीयमित्यत आह सर्वेति
सर्वेतो ब्रह्मणो ज्ञापकं नाम विचारणीयं जीवाभिन्नब्रह्मबोधकं किं नामेति विचार्य वचनाम्नायपर्यायानि पदानि बोधयन्ति पुण
एव चांतरवाक्यानि प्रत्यगभिन्नब्रह्मबोधकानि महावाक्यानि चेत्यवधारयति तानि अवांतरवाक्यानि कानि चित्तत्पदवा
च्यार्थपराणि कानि चित्त्वंपदवाच्यार्थपराणि कानि चित्तत्पदार्थपराणि तत्त्वयेता
वास्मानि भूतानि जायंत इत्यादीनि सत्यादिवाक्यानि तत्पदवाच्यार्थस्य समर्पकानि सत्यं ज्ञानमनंतं ब्रह्मेत्यादीनि च ॥

अमृतवेलासचनाउवज्ञायी विचार ॥

तत्पदलक्ष्यार्थस्य एवं तद्यथा महामत्स्य उभे कूले अनुसंचरति पूर्वं चापरं च एवमेवायं पुरुष उभावेतावनुसंचरति स्वप्नांतं
बुद्धांतं चेत्यादीनि त्वंपदादिवाक्यानि त्वंपदवाच्यार्थस्य समर्पकाणि यो यं विज्ञानमयः प्राणेषु हृद्यंतर्ज्योतिः पुरुष इत्यादीनि
त्वंपदलक्ष्यार्थस्यापीति तथा प्रोषितत्त्वंपदार्थाभेदबोधकपराणि तत्त्वमस्यादीनि महावाक्यानीति श्रोतो कर्मफलपरि
पाकहेतोरनुसंचरति अनुगच्छतीति स्वप्नांतस्वप्नभोगरूपमंतं बुद्धांतं जाग्रद्भोगरूपमंतमित्यर्थः योयं विज्ञानमय इत्यस्याय
मर्थः देहादीनामन्यतमो वा तदतिरिक्तो वा आत्मेति जनकस्य प्रश्ने याज्ञवल्क्यस्योत्तरं योयमिति विज्ञानं बुद्धिस्तन्मयस्तत्प्रायः
प्राणेषु हृदीति व्यतिरेकार्थे सप्तमी प्राणबुद्धिव्यतिरिक्त इत्यर्थः बुद्धिहृदेति विविनक्ति अंतरिति अज्ञानादंतरति ज्योति
रिति पुरुषः पूर्णः योयमेवंभूतः स आत्मेत्यर्थः पुनर्महानुभावत्वविचारणीयमित्याह ॥

ग॰टी॰ २२

वश्यायीति किं नित्यानित्यवस्तुविवेकेन महानुभावत्वं न शक्तिस्येन वेति विनयिना विवेकप्रयुक्तं महानुभावत्वमवधारणीयं अ
थवा अहंतत्वत्ताममहत्वनिष्ठया महानुभावत्वं किं वाहंतत्वत्तापरिच्छेदत्वनिष्ठयेति विनयिना अहंतत्वत्ताममहत्व
निष्ठया महानुभावत्वमिति सम्यगवधारणीयं अथवा सत्यामपि ब्रह्मात्मसाक्षात्कारलक्षणाहंतानिष्ठायां तेन विशे
षमहानुभावत्वं किं वा तन्निष्ठाप्रयुक्तमनोनाशवासनातयसाध्यजीवन्मुक्तिरिति विमर्शपहरेन रमनोनाशवासना
तयप्रयुक्ततन्निष्ठायां सत्यामुत्तरभूमिकात्रितयलक्षणा जीवन्मुक्तिः प्रतिरतिमानसिद्धायां तस्यां महानुभा
वत्वं सर्वसंप्रतिपन्नं हीनत्ववधारणीयमिति ननु यथा जीवन्मुक्तिर्ज्ञानमात्रेण न सिद्ध्यति तथा विदेहमुक्तिरपि ने
व सिद्ध्येत् तेन तस्य ज्ञानस्यावेदयर्थ्यमसंगः स्यादिति चेन्न सर्वदेहानहृतिप्रयुक्तब्रह्मस्वरूपमात्रावस्थानलक्षणा विदेह

कर्मीत्यावैकपञ्चानदरीमोतद्धार ॥

मुक्तिसिद्धेर्वाक्यार्थज्ञानमात्रेणोदयीकारात् प्रत्युत ज्ञानसमकालतया विदेहमुक्तेस्तन्मात्रसाध्यत्वशंकाकरणस्य प्रमाणकौ
शल्यज्ञापकत्वाच्च ननु कर्मणैव हि संसिद्धिमास्थिता जनकादय इति स्मृतौ कर्मणः सिद्धिशब्दितमुक्तौ हेतुत्वकथनात् त
त्कथं ज्ञानस्य तद्धेतुत्वमित्यत आह कर्मीति निरूप्यते यत्र संसारबंधनं मुक्तो कर्मज्ञानप्रकारकत्वेन तत्र कर्मणः कर्म
द्वारेण वा सत्त्वतत्पशरीराद्यपरपर्यायसंसारबंध एव आगच्छतीति न तु मुक्तिः न च ज्ञानं निष्ठितं ज्ञानिन स्तु ज्ञानद्वा
रेण संसारदुःख निरूपितं बंधनिवृत्तिः परमानंदावाप्तिश्च मुक्तिरागच्छतीत्यर्थः यत्तु कर्मणा मुक्तिहेतुत्वं स्मृतौ तत्र कर्म
पदस्य तत्रैश्वरार्पणबुद्ध्या निष्कामकर्मपरत्वात् संसिद्धिपदेनांतःकरणशुद्धिर्वा निदिध्यासनलक्षणप्रत्यक्प्रवणतावा
साक्षात्कारलक्षणज्ञानसंसिद्धिर्वा विवक्षिता न त्वापि कश्चित्साक्षात्कारविद्यापरंपरया निष्कामकर्मणा उपयोगः मोक्षेपि परंपरा

म २२

पर्वं तत्वज्ञानस्य मुक्तिहेतुत्वं निरूप्य तत्त्वज्ञानस्यापनेतुत्वा प्रहृतये स्वनाम्ना मुमुक्षूणां महैतेन लक्षणविशेषं स्वग्रंथे निवध्नीयांवि
हृद्गणवदाचार्य गुरुषा विशेषकर्त्तृक इति ज्ञानमेवैकं निःसंदिग्धं निवेशाय स्वाहैतेन निष्ठां च निरूपयति नानकेति एवं पूर्वेण
चार्यैःपूरिवाहैतेनार्थक नानकेति नाम्नामयापि ज्ञायत इत्यर्थः श्रोतव्यज्ञानमेवसर्वोनर्थवीजाज्ञानविरोधीति तापनाय हैतेन वादि
नामहैतेमानं विनाविवादवता मूकीकर्त्तुं वाहैतश्रुतिमर्थः पठति सभु आपेही सचिआर इति अत्रेदमिति विशेषः तथा चेदं
सर्वमात्मैवेति श्रुतिमाहृत्यैतर्थो बोध्यः सचिआर पदमीश्वरपर अत्रापीदं सर्वमीश्वर एवेति योजनीयं एवं श्रुतिद्वयार्थः स्फुवि
नः श्रुतिद्वयं चात्मैवेदं सर्वं ब्रह्मैवेदं सर्वमिति अत्रानयोः श्रुत्योरचेतनस्य चेतनव्यतिरेकेणाभावप्रतिपादनात् श्रुति

नानक एवै जाणीऐ सभ आपेही सचिआर ४ थापिआ न जाय कीता न होय ॥

तुल्यार्थं निरूप्य केन वा केनाहैतेनिर्विवादतया हैतवादिनां केन विदहह विशेषणाहैतश्रुतौ संभावनात्म्नामयन्तए व
मुमुक्षूणां विचारानुकूले स्वग्रंथे प्रहृतिरप्रत्यूहेति तात्पर्यं ४ नतु पूर्वाचार्यैरिदमयाप्यहैतं तत्वं ज्ञायत इत्युक्तं यत्तदनुपपन्नं
तथाहि तदहैतं केन चिन्मानेन स्थाप्यते नवा आद्ये तत्स्थापकस्याहैतत्वहानेर्द्दैतप्रसंगाहैतवादिनीयः निःप्रमाणि
केनयालीकापत्तेः तदीयज्ञाने च प्रमाणाजन्यतया भ्रमत्वस्य दुर्वारत्वाच्चेति पूर्वपक्षे उत्तरपक्षे स्यादेतत् तेय संगत्यानंतरमाह तथा
प्येति केनापिमानेन स्थापितः परिच्छेद्यो न भवति परोक्षत्वाद् यथा चक्षुरादिना तत्र हेतुमाह कीता न होयेति कस्मात् अपि कि
यायाः कर्म न भवति योहि क्रियते स एव देशादिना स्थाप्यते यथा घटादिः तथा च देशादिनापरिच्छिन्नतया नित्यत्वादहैततत्वहा
निर्नवा हैतप्रसंगस्तत्रेति भावः ॥

ननु यदि देशादिना परिच्छिद्यते न भवति तर्हि वस्तुना परिच्छेद्योऽस्तु वस्तुपरिच्छेदस्य दुर्वारत्वादिति चेत्तर्हि वाच्यमनात्मवस्तुना
परिच्छेद्यः परः आत्मवस्तुना वा नाद्यः अनात्मवस्तुनः सर्वस्यापि जडत्वेन कल्पितनया कल्पितपरिच्छेदहेतुत्वाभावा
ना॰टी॰ २२ त् न द्वितीय इत्याह आपेआप इति आत्मैवात्मवस्तु तस्यात्मवस्तुनश्चिद्रूपतया परा भिन्नतया परस्मिन् परिच्छेदक
त्वासंभवात् आत्माभिन्नत्वं च परस्यायमात्मा ब्रह्म नान्योऽतोऽस्ति द्रष्टेत्यादिश्रुतिवाक्यसहस्रतः ननु यदि केनापि प्र
माणेन परेण परिच्छिद्यत इत्यनेन सर्वैरपि मानैः परो न परिच्छिद्यत इत्यभ्युपगमनर्हिज्ञेहन्नदृयेन दोषद्वयस्य प्रा
प्तिरतस्य कः परिहारः नैवोपनिषदं पुरुषं पृच्छामीत्यादिश्रुतिविरोधस्य च कः परिहारस्तत्र शास्त्रमानेन परि

आपेआप निरंजन सोय ॥

२ च्छिद्यत इत्यभ्युपगमादिति चेत्तत्र केनचिदपि प्रमाणेन परिच्छिद्यत इत्यनेन शास्त्रेतरकेनचिन्मानेन न परिच्छिद्यत इति
नान्यर्थात् ननु तथा सत्यर्द्धजरतीन्यायेन शास्त्रमानेन परिच्छिद्यत इतरमानेन नेत्यंगीकारोऽपनेरिति चेन्न शास्त्रमानेन ल
तल्लक्षणया बोधनेऽसति तदितरमानेन न परिच्छिद्यत इत्येव परमनान्यर्थात् तथा च नानैः प्रमाणकत्वेन परस्यालौका २२
पनिर्नेवामदीयज्ञाने प्रमाणाजस्रतयाऽश्रमत्वप्रसंगेन नानैवोपनिषदमिति श्रुतिविरोधप्रसंगोऽप्येतेन काचि
दनुपपत्तिरिति श्रुतिशास्त्रेतरसर्वमानाविषयत्वाभिप्रायेण निष्कलं निरंजनमिति श्रुतिमर्थयन्नाह पठति निरंजन
सोयेति स च परः सर्वमानविषयत्वरूपसर्वपरिच्छेदहेतोरंजनशास्त्रिताद्ज्ञानतमसा विरहित इत्यर्थः सर्वभ्रम
हेतुज्ञानतमो विरहितत्वेपरस्य तमसः परस्तात् अव्यक्तात्तु तथा परः इत्यादिश्रुतयप्रमाणमिति भावः

ननु परस्मिन्नधिष्ठाने सर्वभ्रांतिहेतुत्वाज्ञानतमस एव तस्य च निवर्तकं निर्दोषं विचारविशिष्टं श्रुतिशब्दरूपं मानं यद्यपि तथा
पि तन्मानं नैकेषां प्राप्यमिति चेदीश्वरभक्ता एव तत्राह जिनेति येषां मुमुक्षुभिः सर्वपुरुषानुग्रहार्थं भक्तानुग्रहार्थं वाकारि तेनोद्धा
रक श्रीहलभादिमूर्तिधरः परमगुरुर्निष्कामधर्मानुष्ठानेन परः सेवितः तेषां मुमुक्षूणां तत्प्रमाकरणभूतं मानं प्राम्^
नैवाप्राप्यतरमित्यर्थः ननु प्राममपि तेषां नादृष्टं श्रुतिमानं केवलं सन्निकरोतीत्यत आह नानेकेति येनाज्ञानतमो

जिनसेव्यानितपामान ॥

निरोधिप्रमाकरणभूतेन श्रोत्रियब्रह्मनिष्ठगुरुमुखप्रयुक्तेन न तु केवलेन सर्वदोषविरहितेनापौरुषेयेन मानेन श्रु
तिलक्षणेन गुणीकृत्य नसम्यसंकल्पत्वादिगुणविशिष्टो वा सर्वज्ञत्वादिगुणविशिष्टः कालाकालो गुणिन्यादि श्रु
तिः निरूपितो नानि धीयतेस्मिन्सर्वमिति निधानं यत्रायं यन्त्यभिसंविशन्तीति श्रुतिनिरूपितकार्यमात्रलयाधिकरणभू
तो जगल्लयकारणत्वादिगुणविशिष्टः परमेश्वरः कथ्यते लक्षणया कल्पितगुणानिःकृष्टतया वा बोध्यत इत्यर्थः ॥

अथवा येन मानेन सम्यग्ज्ञानमनंतं ब्रह्मेत्यादिना स्वरूपलक्षणेन सम्यक्त्वज्ञानत्वादिस्वरूपलक्षणगुणवान् यतो वा इ

न॰टी॰ मानि भूतानि जायंते इत्यादिना तटस्थलक्षणेन च निधानमुपादानकारणं निमित्तकारणं च तदुपलक्षितो वेदमूर्तिः

२५ यत्नो निगद्यते इत्यर्थः अथवा यः परः श्रुतिस्मृतिभिर्गुणिसनास्मरणानानंदिनादिगुणविशिष्टः सर्वस्य निधानमधि

ष्ठानं सोपाधिककारणत्वगुणविशिष्टश्च कथ्यते स यैर्मुमुक्षुभिः सेवितो निष्कामधर्मानुष्ठानं तथा जितलक्षसारा

नानकगाथीये गुणीनिधान ॥

वयिः तैः प्राप्यते तत्त्वमाकरणभूतं गुरुमुखविचारविशिष्टं तत्त्वमस्यादिमानमिति संबंधप्रकारेणार्थः अथवा गुणी २५

निधानमित्युभे मानस्य विशेषणे भवतः तथा चाकिंभूतं मानं गुणिनिधानं चापौरुषेयत्वनिर्दोषत्वादिगुणवि

शिष्टं प्रमायाः स्थानं च कथ्यते श्रुतिभिः स्मृतिभिर्विद्वद्भिश्चेत्यर्थः ॥

नन्वपरमेश्वरमन्तास्वमुक्तं न प्रतिप्रापितेन निर्दोषश्रुतिमानेन परमेश्वरतत्त्वकथनादनंतरं किं भवतीत्यत आह गावीये
इति यदा विशिष्टगुरुप्रयुक्तेन श्रुतिमानेन तत्त्वमसीत्यादिना परमेश्वरतत्त्वं प्रतिपाद्यते ततोऽनंतरं साधनसंपन्नैर्मुमुक्षुभिः
श्रूयते श्रवणानंतरविचारेणाप्रमाणासंभावनादिनिवृत्तिफलकेन श्रोतव्य इत्यादिवाक्यविहितेन विषयीक्रियत इत्यर्थः
श्रवणं नाम षड्विधतात्पर्यलिंगैः सर्वेषां वेदांतानामद्वितीये ब्रह्मणि तात्पर्यावधारणं ननु तानि कानि लिंगानीति चेदु
पदर्शितानि वृद्धैः उपक्रमोपसंहारावभ्यासोऽपूर्वता फलं अर्थवादोपपत्ती च लिंगं तात्पर्यनिर्णय इति प्रकरणप्रतिपा
द्यस्याद्वितीयस्य ब्रह्मण आद्यंतयोः प्रतिपादनमुपक्रमोपसंहारौ यथा छांदोग्ये सदेव सोम्येदमग्र आसीदेकमेवाद्विती

गावीयेस्तुणीयेमनरतीयेभाव दुःखपरिहस्तुखवरलेजाय ॥

यं ब्रह्म ऐतदात्म्यमिदं सर्वमिति प्रकरणप्रतिपाद्यस्य पुनः पुनः प्रतिपादनमभ्यासः यथा छांदोग्ये तत्त्वमसीति नवकृत्वो
भ्यासः प्रकरणप्रतिपाद्यस्य मानांतराविषयत्वमपूर्वता यथा छांदोग्य एव तं त्वौपनिषदं पुरुषं पृच्छामीत्यादि ब्रह्मणो मा
नांतराविषयत्वं प्रकरणप्रतिपाद्यस्य ज्ञानात् श्रूयमाणं तत्प्राप्तिलक्षणं प्रयोजनं फलं यथा तत्रैवाचार्यवान् पुरुषो वेद त
स्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य इत्यद्वितीयवस्तुनो ज्ञानात् तत्प्राप्तिश्च प्रयोजनं प्रकरणप्रतिपाद्यस्य तत्र तत्र प्रशं
सनमर्थवादः यथा छांदोग्य एव येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमित्यद्वितीयवस्तुनः प्रशंसनं प्रकरणप्रतिपा
द्यस्य दृष्टांतेनोपपादनमुपपत्तिः यथा छांदोग्ये यथा सोम्यैकेन मृत्पिंडेन विज्ञातेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारंभणं विकारो ना
मधेयं मृत्तिकेत्येव सत्यमित्यादिवाक्यप्रतिपादितमृदादिदृष्टांतैरद्वितीयवस्तुन उपपादनमिति श्रूयत इत्यस्य लक्षणमन्यत्रस्यापि

र्थं तथाचतस्माच्छ्रवणादनंतरंतदेववेदांतप्रतिपाद्यंश्रवणलक्षणविचारविषयभूतंपरमेश्वरपरमार्थतत्त्वंमन्यते
मननलक्षणविचारेणश्रवणानुकूलतर्कानुचिंतनमानसोहतिरूपेणप्रमेयासंभावनादिनिवृत्तिफलकेनमंत
जे·टी २५ व्यमित्यादिवाक्यविहितेनविषयीक्रियतइत्यर्थः मननंनामश्रुतार्थस्यानुकूलतर्कैरनुचिंतनंततः किमित्यतआ
ह मननइतीयद्युक्तितत्स्वकौनुचिंतनरूपान्मननादनंतरंतत्त्वंमनसिदृढीस्थाप्यतेस्वाकारवृद्धिहतिप्रवाहेणसजा
तीयेनविजातीयप्रत्ययानंतरितेनतैलधारावदविच्छिन्नेनविपरीतभावनानिवृत्तिफलकेननिदिध्यासितव्यइ
त्यादिवाक्यविहितेननिदिध्यासनाख्येनविषयीक्रियतइत्यर्थः निदिध्यासनंनामविजातीयप्रत्ययानंतरि
तसजातीयप्रत्ययप्रवाहइति ततोपिकिंभवतीत्यतआह भावइति ततोभावाज्ज्ञानदीप्तिरिहैतत्त्वाभिव्यंजकात
त्वमस्यादिमानजन्यात्प्रमाणरूपात्साक्षात्काराद्व्याहृतब्रह्मास्मीत्येवमाकारात्सर्वसुकृतफलरूपाच्छ्रवणाद्या
वृत्तिपरिनिष्पन्नोदिताभवतीत्यर्थः एवंपरमेश्वरतत्त्वज्ञानस्योत्पत्तिंश्रवणादिभिरुक्त्वे
दानींतत्साध्यांसर्वसंसारदुःखोपरतिरूपांमुक्तिमाह दुःखेति साचज्ञा
नदीप्तिरुदितादुःखमज्ञानतत्कार्यरूपंसर्वानर्थंपरिहृत्यस्वयमप्य २५
ज्ञानकार्यत्वाद्दग्धकाष्ठवह्निन्यायेनतत्स्वस्थानेब्रह्मणिलीना
स्यादित्यर्थः ॥ ॥

ननु सर्वानर्थनिवर्तकः परमसुखप्राप्तिको यः साक्षात्कारः प्रमाणाश्रितः श्रवणादिद्वारा तस्य हेतुप्रमाणभूतवाक्यं कुत्र व
र्तत इत्यत आह गुरुमुखेति यत्साक्षात्कारहेतुमानभूतं वाक्यं तत् श्रोत्रब्रह्मनिष्ठगुरोर्मुख एव वर्तत इत्यर्थः ननु काण्डत्रयात्मकेन वेदप्र
वचनद्वाक्यं ज्ञानेनयाह्यं सर्वेषां वाक्यानामधिकरणत्वाद्वेदस्येत्यत आह गुरुमुखे वेदमिति यस्त्रिकाण्डात्मकरूपो वेदः सोपि गुरोर्मुखे
एव यथाधिकारं काण्डत्रयात्मकवेदस्योपदेशमत्वान्मुखस्येत्यर्थः नन्वनेन शाखामयमुखस्याविस्तृतकाण्डत्रयात्मकस्येश्वरमुखा
त्रिस्थासन्न्यायेनातिः स्तनस्य वेदस्येश्वरमुखे निवेशः सत्यपि सर्वेषां मर्यावत्तारीश्वरस्य ब्रह्मनिष्ठस्याप्याचार्यगुरोर्जीवविशेष
स्येश्वरवत्सर्वसामर्थ्याभावेन कथं तत्सुखे निवेशस्त्यत आह गुरुमुखेरहियाइति ईश्वरवद्गुरोर्मुखेपि निवेशात् एव वेद
इत्यर्थः तत्र हेतुमाह समाधीति यतः स श्रोत्रियो ब्रह्मनिष्ठगुरुः माधी परमेश्वरो ब्रह्मविद्ब्रह्मैव भवतीति श्रुतेस्तानी तान्मेवा

गुरुमुखेनादं गुरुमुखेवेदं गुरुमुखेरहियासमाधी गुरुईश्वरगुरुगोरखबरमागुरुपारबतीमायी ॥

मेमतमितिस्मृतेश्चेत्यर्थः तस्मादाह शास्य गुरोः परमेश्वररूपत्वमेवाह पूर्वोक्तार्थदृढीकरणाय गुरुरिति अत्र गुरोर्भक्तानुग्रहार्थं
परमेश्वरेणाद्धृतमूर्तिर्वित्रितयस्य मध्ये प्रथमं शिवरूपत्वं वदति गुरुरीश्वर इति गुरुरीश्वर इति गुरुश्च शिव ब्रह्म तत्स्व भक्तान् ॥
जिज्ञासून्प्रत्यनुकंपामत्वादित्यर्थः अथवाह प्रमात्रमपंचलयानुकूलेशानशक्तिमत्त्वमीश्वरत्वं लयश्चात्र ततेहतना
त्निकिं च तेन्यादिश्रुत्यनुसारेण वाथरूपो विवर्तितो तत्स्वरूपापमर्देन रूपः तस्य प्रलयादौ सत्यपि प्रयोजनाभावेना
विवर्तनत्वात् तथा च तेनाह शामीश्वरत्वं शिवत्वं च गुरावभिमन्य गुरुरीश्वर इत्युक्तं तथा गुरु गोरख इति गवां वेदवचसां रक्ष
तीति गोरक्षः यथा लिङ्गः परमेश्वरो वेदविरोधीन् निरस्य तत्प्रवर्तकः तथा वेदवेदमार्गवारतत्तिद्याव स्थापयति ते
या गुरु गत चार्योपि दैत्यसदृशान् वेदबाह्यान् वेदवाह्यान् विनाशिकान् आरम्भवादिनो वेदान्यथायोजनापरानतार्किका

जे·टी·
२६

दीनतिरस्कृत्योनरकांडरूपंवेदंप्रमाणेगुरुक्तिभिश्चाहैनब्रह्मपरतयाप्रतिपादनेनरत्ततिव्यवस्थापयतीत्यभिप्रेत्यगुरुहेत्य
तस्तुतेनतथागुरुब्रह्माव्वहेनरत्नतिसर्वेषुलोकेषुवेदमर्यादाप्रवर्तकतयाहाहः ब्रह्मलोकस्वामीब्रह्माय्यातथागुरुरपि
सर्वेषुशास्त्रीयेषुमस्तुतत्वेषुलोकेषुयथाधिकारंवेदमर्यादाप्रवर्तकतयाहहेतरत्यभिप्रेत्यगुरुब्रह्मेत्युक्तवरमेतिपादस्यब्र
ह्मार्थकत्वंतेयमथ्यगतस्मन्नीयगुरुपदस्यदेहलीदीपन्यायेनोभयान्वयोबोध्यः एवंगुरोरीश्वरमूर्तित्रितयरूपत्वमुक्त्वे
दानींतद्व्यक्तित्रितयरूपत्वमप्युच्यते गुरुःपारवतीति यथापरमेश्वरमूर्तिस्वरूपभूतेदाक्षायणीहिमवतः परवतस्यापत्य
भूतंविग्रहंप्राप्यापिनस्वनिष्ठायाः प्रचलिता तथाब्रह्मदर्शीगुरुरपिप्रारब्धकर्मणादेहेंद्रियादिनिष्ठंविविधचरितरू
पंनानाविशेषमिंद्रजालिकरवप्रदृष्ट्याप्राप्यापिनोहैनब्रह्मनिष्ठायाः प्रचलतीत्यर्थः तथागुरुकमालक्ष्मीभवति इं
पदव्याख्यासरस्वतीचयथापरमेश्वरमूर्तिस्वरूपभूतैवश्रीः प्राणिकर्मानुसारेणानमनमथममदलतत्त्वणोविषमभा
वमापन्नापिनस्वनिष्ठायाप्रचलतितथागुरुरपीत्यर्थः अथवाश्रीःस्वसान्निध्यतः संपन्नत्वलत्त्वणोयनितंपुरु
षंकरोतिसंपद्विरहितत्वलत्त्वणंतादारिद्र्यंवहरतितथागुरुराचार्योपिस्वसान्निध्यतआत्मज्ञानयतनिषप्रत्रमायि
कारिणंपुरुषंकरोति ततएवाज्ञानतत्कार्यलत्त्वणंदारिद्र्यंचहरतीतिनत्यर्थः एवंयथापारमेश्वरीसरस्वतीदेवतास्तो
पासितान्स्वोपासकान्निरंतरंतद्गतपरान्मुह्दान्यदभिलषितंतदचिरंसंपादयतिकृपालुस्वभावत्वाद्दाक्षायण्याः
तथास्तोपासितानात्ममुह्दानःकरणानपिकारिणोमुमुक्षून्मोक्षव्रतपरान्गुरूपासनयातोषितमानगुरुरपिकृपा
लुस्वभावत्वादचिरंतदभिलषितंमोक्षपदंसंपादयतिज्ञानद्वारेत्यर्थः केचित्तुमात्रैकमायीपदमेकंपारवत्याविशे
षणपरमितिव्याख्यायते तत्रसाधुतस्यपारवतीपदस्यप्रामृतिपीठवृत्तिपरत्वेपितदितरेषांमत्तेशक्तिपरत्वासंभवा
त् मायीत्यस्यैकपदत्वगौरवातमायदस्यपदस्यचविस्पष्टमलशन्नोः श्रीभारत्योः परत्वसंगामस्त्रीयपुरुषेषुप्रासिद्धेश्चेति २६

ननु सत्यं त्वं गुरुरूपमेव भेदमन्यसे यथोक्तं तथापि स्वमात्मानं कीदृशं जानासीत्यत आह जे हौ जाणौ ति तस्य गुरोः प्रसादात्
यादृशमात्मानमहं जानामि तादृशं तं न कथयामि तत्र हेतुमाह कहिणा कथन न जायी ति तस्य स्वरूपज्ञानस्य वचसा कथ
नेविषयत्वेनोपपादनासंभवात् यतो वाचो निवर्तन्ते अप्राप्य मनसा सहेति श्रुतेः ननु यतो वाच इति श्रुतिर्यथा वचोविष
यत्वमुपपादयति ब्रह्मणस्तथा मनोविषयत्वमपि तस्माद्वचोविषयत्वे श्रुतिर्मानमिति न च संभवतीति चेन्न ममाप्युभयाविषय
त्वोक्तेर्नानर्थक्यात् ननु तथापि तं त्वौपनिषदं पुरुषं पृच्छामि दृश्यते त्वग्र्यया बुद्ध्येत्यादिभिरुभयविषयत्वोपपादनाद्विरोध इति
चेद्लक्षणया सदसद्भावाभ्यामविरोधात् ननु लक्षणयापि केन किं बोधितमित्यत आह गुरु इति श्रोत्रियब्रह्मनिष्ठेन गुरुणा ल

जे हौ जाणा आखौ नाही कहिणा कथन न जायी गुरु आइ कदे हत्थु फाई ॥

क्षणया तत्त्वमस्यादिवाक्येभ्यः श्रीदेकस्यैकदेहो बोध्यत इत्यर्थः अज्ञात्वैवार्थं बोधनपरवेदान्तवाक्यविचारपरेषु गुरुषु एकव
चनप्रदानमलंकारायैव न दोषायेति बोधनाय स्पष्टतया तृतीयैकवचनं सातात्म्येनाभिहितं गुरु आइ इति अत्र तृतीयैकव
चनेन गुरुणेति वक्तव्येऽपि भाषाविशेषाभिप्रायेण गुरुस्त्वारम्भमिति एतेनैकजीववादेऽपि संगमनो गुरुणामिति ज्ञायते
अणवानेकजीववादस्याप्युक्तैकवचनं न प्रदेयं गुरुत्वप्रतिशिष्टराधिकारिभिः शिष्यैः कदाचिदिति लौकिकप्रसिद्धानुद
योयोरेवानामन्वबुध्यत एव न तद्भवदिति श्रुतेर्जीवानेकत्वप्रसिद्धाविहापि सात्त्विधिवार्थे जीवानेकत्वं स्पष्टातादृसमाणेवा
वगुरुभिर्विविधशिष्याणां नियमाधिकारोपदेशकत्वेऽपि श्रीदेकदेहो बोध्यत इति तत्रैव यावज्जीवं वचनमेवाङ्गीकार्यं न त्वेकवचन
मिति व्याख्येयं ॥

गुरुबोधितस्याखंडस्यैवात्मार्थस्य ज्ञानं कीदृशमिति चेत्स्मृतएव सभनेति यः सर्वेषां ब्रह्मादीनां जीवानां त्वंपदार्थानां कार्योपा
ग॰टी॰ धीनामंतःकरणोपाधिभेदेन भेदमागतानामीश्वरः तत्पदार्थः कारणोपाधिर्मायोपाध्यैक्येनैकोदानातनजीवकर्मोपास
२२ नाफलस्य सुखदुःखादेर्दाता त्वमापन्नो मायया सर्वज्ञत्वपरोक्षत्वादिविशिष्टः स एव शोधितस्तत्पदार्थो मायानिकृष्टोहमप
रोक्षत्वकिंचिद्ज्ञत्वाद्युपाध्यंतःकरणनिकृष्टः शोधितस्त्वंपदार्थोस्मीत्यर्थः एतेनाहं ब्रह्मास्मीति वाक्यार्थो दर्शितः तत्तेवब्र
ह्मात्मस्वरूपं कदाचित्स्मरसीत्यत आह विस्मरनजायीति ब्रह्मात्मत्वरूपस्य स्मरणं तदा स्याद्यदि विस्मृतिर्भवेत्नैवं तथा त्वात्स्मरण
स्य यदि विस्मृतिरेव न भवति तर्हि कुतस्तत्र स्मरणप्रसंग इत्यर्थः एतेन वाक्यार्थे ब्रह्मात्मैक्यास्थितत्वप्रदर्शितमिति
बोध्यं ननूक्तब्रह्मात्मत्वज्ञानमहमपि कदाचित्प्राप्स्यइत्यपेतापातत्राभिमन्वयव्यतिरेकाभ्यां दर्शयति तीर्थेनेति ॥

सभनाजीयाकाउकरानासोमैं विसरनजायी ५ तीर्थनावाजेतिसभावाविरागभागोकिनायकरी ॥

अज्ञानात्तत्कार्यमलविरोधिनिज्ञानलक्षणतीर्थे सर्वदेहत्वभ्रांतिमलनिराकरणेनाद्वयानंदाभिव्यक्तिलक्षणस्नानेनहि स्यादित्युत्त
क्तब्रह्मात्मत्वस्य श्रवणमननोत्तरभाविभावनं निदिध्यासनाख्यं स्यादित्यन्वयः निदिध्यासनाख्यविभावनाभावेन तु ब्रह्मा
त्मसाक्षात्कारात्मकतीर्थे अज्ञानतत्कार्यमलस्य क्षालनरूपस्नानं किं स्यात् किमपि स्यादिति व्यतिरेकः स्वयदात्वमन्वयव्यतिरेका
भ्यां श्रवणमननोत्तरनिदिध्यासनसाक्षात्कारयोर्ब्रह्मात्मविषयोः साधनसाध्यभावमेव यादृपासितदा ब्रह्मात्मैक्यज्ञानप्रा २३
प्यस्मरति भावः अथ एवोक्तज्ञानतीर्थे उक्तस्नानं तदा स्याद्यदात्मस्येसारमुत्यस्य गुरोरस्मत्यद्वाच्यस्य ब्रह्मपित्रिकारिणोऽयं स
म्यग्ज्ञानोपदेशो यो गायाइत्येवंरूपविभावनं ज्ञानोपदेशानुकूलविवेकवत् बुद्धिविषयत्वं भवत्येन तदभावे कथं किं वा ज्ञा
नमपमर्पितुकाः कौकिरिष्यति न कथमपि न किमपीत्यर्थः

एवेनस्य परमेश्वरस्य गुरोर्विभावनमेव वदति मय्यन्यास्मिन्वा ब्रह्मसाक्षात्कारहेतुरित्युक्तमिदानीं तद्विभावने कोऽहमित्य
पेक्षायामस्मिन्जन्मनि जन्मान्तरे वा परेशः प्रसीदति येनाभिमानफलाभिसंधित्यागपुरःसरमनुष्ठितेन निष्कामक
र्मणा तदेव हेतुस्तद्विभावनस्येत्याह जेतीति शास्त्राधिकारिणं कर्मसापेक्षेणापरेशो नोन्यादिनां यावतीसज्ञत इति खु
यस्यामहिर्देहेंद्रियप्राणांतःकरणरूपोपाधिमहद्रूपप्रयाणमिनतोपाधौ सकामकर्मानुष्ठानं विनापि न किंचिद्देहहे कुं
सुखमामुष्मिकं च संसरद्भवति परमेश्वरप्रसादहेतुर्निष्कामकर्मानुष्ठानं विनानुकिंस सद्भस्पाद्यदहरहर्णामिन कि
मपि तदनुष्ठानं विना तथाहि नतावदंतःकरणशुद्धिर्निष्कामकर्मानुष्ठानं विना तदभावेन विवेकवैराग्यादिसाधनसंप

जोनीसिखउपायीवेत्ताविणकर्मांकिमिलेलयी मति
विचरतजबाहरमाणिकजेइकगुरुकीसिष्यसुणा ॥

त्तिः तदभावेन हि ज्ञानार्थं सद्गुरुमेवाभिगच्छेदित्यादिश्रुत्युक्तं गुरूपसदनं न भवति गुरूपसदनं विना गुरोः शिष्यपरीक्षा
त्मकं विभावनं न भवति तस्मात्परंपरया विभावनायाधिकारिणा पुरुषेण भगवदाज्ञया निष्कामकर्म कार्यमित्यभि
प्रायः एवं गुरुकृतेन शिष्यपरीक्षात्मकेन विभावने निष्कामकर्मणः परंपरया साधनत्वमुक्तं न हि भावनमपि किंसाक्षा
त्कारहेतुः परंपरया वेति चेत्परंपरयेत्याह मतिविवेति अयं यदा गुरुकृतेन विभावनकाले शोधितमनस्त्वंपदार्थयोरैक्ये गु
रूपदेशात्तत्त्वंपदैरुपदेशेन तदास्मिन्नर्थविषयगुरूपदेशश्रवणानन्तरं निदिध्यासनसहकृतेन ज्ञातेनायामहं ब्रह्मास्मी

त्येवंभूतायामनोरत्यमनिरमयति क्रीडयतीति तथा मतेः प्रेरकमधिष्ठानभूतं ब्रह्मचैतन्यमाविर्भवतीति शेषः स्व
यमेव रत्यपदं व्याचष्टे माणीति करतीति बुद्धेर्वृत्तीनां मणीरिव प्रकाशकं यत्तत्त्वपदवाच्यं चैतन्यमित्यर्थः ननु
गी·टी· २८ दैवाभिव्यक्तं सततं ब्रह्मचैतन्यं किं करोतीत्यत आह जन्माहरतीति अधिकारिणः पुरुषस्य जन्ममज्ञानकृतं बहिर
नात्मभूतेषु विषयेषु मनःप्रवणतारूपवेगं वा जन्ममरणादिलक्षणस्यानादिसंसारस्य हेतुं यत्तद्वदन्ति शिष्टाः तद्धरण
मेव वेगमास्समनादज्ञानहरणपूर्वकं हरतीति विनाशयतीति जवाहरमज्ञानतत्कार्यं निखिलदुःखविनाशकं भवतीति
तत्राभिव्यक्तिसद्ब्रह्मेत्यर्थः अयं भावः श्रोत्रियब्रह्मनिष्ठगुरुमुपावहित्य विवदुपसन्नस्य साधनवतोऽधिकारिणो
धिकारित्वावधारणानन्तरं परीतात्मकं विभावनं करोतीति ततस्तस्मा उपदेशायोग्याय सर्ववेदान्तप्रतिपाद्यत्वेन ब्रह्म
तत्त्वं श्रावयतीति सर्वाधिकारित्वेद्वितीयं ब्रह्म तत्सर्ववेदान्तप्रतिपाद्यमित्यवधारयित्वा गुरुप्रसादात्परमकृपालोः
प्रमेयसंशयादिनिवृत्त्यनुकूलं तर्कानुचिंतनरूपमननेन तत्त्वतो विपरीतभावनानिवृत्त्यनुकूलं विजातीय
प्रत्ययानन्तरितसजातीयप्रत्ययप्रवाहरूपेण निदिध्यासनेन कृतेन ततस्तवाक्यमप्रतिबद्धं सदहं ब्रह्मास्मी
त्येवंभूतामखंडाकारां ब्रह्माभिव्यंजकामज्ञानतत्कार्यविनाशिकां निर्विकल्पसाक्षात्कारपदवाच्यां मति २८
मुत्पादयतीति परंपरया गुरुविभावनस्यापि साक्षात्कारहेतुत्वमिति शेषपदानि पूर्वं व्याख्यातानी
हितो व्याख्यायन्त इति ॥

एवंगुरुमुखेनादमित्यत आस्येयनाप्रवंधेनावांतरविशेषकथनेन गुरोरीश्वरतत्वज्ञानतईश्वरतुल्यतोपपादनरूपांप्रशंसामुक्त्वा
येदानीमीश्वरतत्वज्ञानरहितेयक्त मापिनिंदंति जेम्नुगति यस्यकस्यचित्पुरुषविशेषस्यायुश्चतुर्युगमर्यादातनोन्यादशेगुणाच
भवति अनेनायुषश्चतुश्चत्वारिंशाद्युगमर्यादोक्ता समुच्चयविवक्षया विकल्पविवक्षयातुयस्यपुरुषविशे स्यायुश्चतुर्युग
पर्यंतावातनोन्यादशागुणाचत्वारिंशद्युगमर्यादावाभवतीत्येवं भवंतुपुरुषायुरेवंततः किमित्यत आह नवेति यश्चसएव
दृष्टिव्यानवखंडेषु प्रशस्तनयाज्ञातेयनःस्वर्वेदेवाःपितरःऋषयोमानुषाश्चसहगच्छंतिप्रत्येकेकस्तुपासनादिभिःप्रसादः॥
नेनेत्यर्थः अथवाप्रत्येकतर्पणेनसर्वेसहगच्छंतिप्रतिदिनंतदर्थंयथासंभवदानमेकादित्वादित्यर्थः पुनरपिथिकामाह वंगेति
अयमतिप्रशस्तोयमतिप्रशस्तइत्युक्तेष्टेनामान्येभ्यःस्वनश्चधारयितायशासासहकीर्तिजगतिमिरहृत्यति शास्त्रीयगुणप्र
जेम्नुगचारेआरजाहारदसाणिहाय नचाखंडाविचजाणियेनालवलेसमकोय चंगानादरतायकैयशकीर्तिजगलेय
काशनेनोत्कर्षातिशयकथनंयशः लौकिकगुणयोगतनंकीर्तिः अनयेनेवतिभेदः (जेनिसनदरनआवयीनावानतस्थछेकेय॥
अथवान्यकर्तृकंयशसः कीर्तिमुक्तिमुपलभनइतिव्याख्येयमितिनत्रिहकल्पनमितिभावः फलितमाह जेनिसेति यदोकसेवा
मुक्तयेवनोपितम्यव्रहत्वाहसितात्कारलक्षणासाधनक्रमेणनागच्छति नर्हिनाटशस्यवातामपिकोसिकिमभियानपुत्रोसिकिल
त्यक्रियतेतत्वयेन्यायुदंनकोपिनएच्छतीत्यर्थः ननुनस्येष्वर्थविशेषवतोवर्तीकोपिनएच्छतीत्यनुपपन्नं किंसर्वथाप्रसिद्धिमत्ता
नहृतांतंनएच्छतिकोपिकिंवातिनिरूपप्रयुक्ततयानंइहितत्वात नान्यमतित्सूनत्वलक्षणनिरूपप्रयुक्तत्वाभावेनप्रसिद्धिरहित
त्वाभावात ओघरूष्टापतिःनामादितःप्रसिद्धस्यहतानंएहपेघरणात्यायेनकःएच्छतीतिचत्रमुमुक्षुभिरुपेतत्वात नकेपीन्यत्रादिम
शाद्वेनममुक्षुणापुरुषविशेषाणांविवतितत्वात मुमुक्षवोतकेपिएच्छंतिअथवासाकृतास्तुएच्छन्तुनवाएच्छतुनिष्कामेधुमायत्रद्धार
(ममुक्षुमध्येनकोपिनस्यदेवप्रियनादिविशेषवतोपितानीनएच्छतीत्यर्थः ॥

तमेवपुनर्विशिनष्टि कीटेति कर्मणांपुण्यपापरूपाणांवैचित्र्यात्केनचित्कर्मणोऽस्वर्ग्यादिमन्वेपि कदाचित्केनचित्कर्मणा
सएवपुनः कीटेपुमध्ये कीटः क्रियतइत्यर्थः तमोगुणकर्मणांफलमुक्त्वा रजोगुणकर्मणांफलमाह दोषीति कदाचि
ज०टी० त्केनचित्कर्मणा दोषी भवति दोषीति पदंस्वयमेवव्याचष्टे दोषयरेयेति रागद्वेषादीन्दोषान्धारयतीति दोषीत्यर्थः
२९ ननुसत्त्वविधकर्मणांत्रिविधंफलंपरमेश्वरार्पितानांनिष्कामकर्मणांकिंफलंभवतीत्यतआह ज्ञानकेति निष्काम
कर्मभिः प्रसादंतुप्रगतोज्ञानकपदवाच्यः परमेश्वरस्तावत्त्रिगुणेषुविवेकवैराग्यादिगुणरहितेषुतानेवविवेकादीन्गुणा
न्करोति तस्मान्निष्कामकर्मणामन्तःकरणशुद्धिद्वाराविवेकवैराग्यादिफलंभवतीतिभावः किमेतावन्मात्रेणकृतेनहेत्यत
नेत्याह गुणवन्त्येति यईश्वरप्रदत्तविवेकादिगुणवन्तंतान्पुनः परः स्वस्वरूपाचार्यगुरुद्वाराज्ञानगुणंमोक्षंप्रतिसाधयन्तद
कीटाश्चंदरकीटकरदोषीदोषधरेय ज्ञानकनिर्गुणगुणाकरेगुणवन्त्यागुणादेय ॥
दातीत्यर्थः ननुज्ञानस्यत्रिगुणात्मकाज्ञानविनाशेनगुणमात्रविनाशकत्वात्तस्यगुणत्वेवस्तुनैववस्तुनाशप्रसंगात् यमथ
र्मिणोरभेदेनधर्मिणोज्ञानिनोपिविनाशापत्तिरितिचेन्नज्ञानस्यत्रिगुणात्मककार्यविनाशकत्वेऽपिभूतस्यज्ञानिनो
विनाशकत्वाभावात् नचस्वविनाशेनसहस्वधर्मिणोज्ञानिनोपिनाशः स्यादितिवाच्यंअन्तःकरणस्यैवहि
त्वेपिविद्रूपेज्ञानिनिधर्मिणितस्याहंब्रह्मास्मीतिज्ञानेनैवनिषेधात् नह्यहंज्ञानीत्यनुभवतिसः ननुममपिज्ञानमित्यनुभव
ति नवेतिचेदनुभवत्येवतथाप्येवंममापिनित्यज्ञानस्वरूपेब्रह्मणिवाक्यजन्यान्तःकरणवृत्त्यात्मकंज्ञानमपिनास्तीति
सहस्रमात्रेणतः पातित्वात् नहिज्ञानिनिव्यवहारः शास्त्रेषुकथमितिचेत् यावत्प्रारब्धकर्मदेहद्वयसद्भावेनाहंब्रह्मेति
वृत्त्यात्मकज्ञानस्यविद्यमानत्वात्तावत्तत्रौपचारिकतयाज्ञानित्वव्यवहारस्तत्वदामरस्यात्मनः संगकेन ॥ २९

ननु निष्काममधर्मानुष्ठानरिपदीश्वरो गुणं करोतीति निर्हि तस्मिन् केन क्रियंते गुणा इति चेत्तत्केनापीत्याह नेहा इति किंकार्योपाधि ॥
नाजीवेन नास्ति शौर्य ऐविवेक वैराग्यादिगुणाः क्रियंते न्येन वा आद्ये परिहारमाह नेहेत्यादिना नाहं शोजीवः कश्चिन्जायते
यः तस्मिन्नीश्वरे गुणान् करोतीत्युत्तरार्थः द्वितीयेपक्षेपि किमीश्वराद्न्येन किंवाजीवाद्उभाभ्यांवा आद्येपीश्वरादन्यो जीवोवाब्रह्म
वाजगद्वा आद्येसोपाधिनावानद्वाद्वितीयेन वा आद्येपरिहारउक्तः नेहेत्यादिना द्वितीयस्योपाधिरहितस्यजीवस्य चिद्रूपतयात्र
तस्यैवाभावात् नापिब्रह्मणापत् तस्यैवमायया ईश्वरत्वात् नापिजगता तस्येश्वरे कल्पितत्वया जडत्वेन मिथ्यात्वात् अन्ये

नेहाकोयनसत्फयोजितिसगुणाकोयकरेय ॥

स्वरादन्येनेश्वरे गुणाः संपाद्यंत इति पतो न जीवादन्येन तत्र गुणाः क्रियंत इत्यत्रापि तथा जीवादप्यन्य ईशो वा शुद्धो
वाजगद्वा नाद्यः तयोर्निःस्वरूपचिद्रूपतया भेदायगमात् न द्वितीयः शुद्धस्यैवोपाधिविवतया जीवेश्वररूपत्वात् न तृतीयः
जगत ईशे रेवजीवे कल्पितत्वया जडत्वेन मिथ्यात्वात् अतो जीवादन्येनापि गुणा न क्रियंते एतेनोभाभ्यामन्येनेत्यपि
निरस्तः उभाभ्यामन्यस्य ब्रह्मणः स्वरूपत्वात् जगतश्च मिथ्यात्वाच्च ननु मायया ईश्वरे गुणाकर्तृत्वमस्त्विति चेत् सापिस्वतं
त्रा परतंत्रा वा नाद्यः तस्या मायायामायाविवत्वशीलत्वेनास्यान्सर्वज्ञईश्वरस्त्यारोपस्वतंत्रत्वनिषेधनात् द्वितीयेपि परतंत्र
त्वं नाम स्वतः सत्तास्फूर्तिरहितत्वं एता दृशा गुणा संपत्त्या या मिथ्या जडरूपायाः कथमीश्वरे गुणासंपादकत्वं तस्माद्यथाप

रमेश्वराधीनायामायायाश्चानिर्वचनीयत्वं तथामायायाहनिविशेषत्वपरिणामस्तत्संकल्पत्वानामनिर्वचनीयानामेवानि
ज·री· र्वचनीयगुणसंपादकत्वमित्यभिप्रायः अथवा नत्वन्यएवकश्चिद्देवताविशेषस्तस्मिन्नधिकारिणिगुणपदवाच्यसाधन
३० संपत्तिंकरिष्यतिकिमीश्वरेणेतिचेत्तत्राह नेहाकोयनेत्यादिना नाहशः कश्चनतत्प्रतीयतेईश्वरादन्योयः तस्मिन्निष्कामक
र्मानुष्ठानप्रयुक्तशुद्धांतःकरणेधिकारिणिगुणपदवाच्यविवेकवैराग्यादिकंज्ञानसाधनंकरोति देवताविशेषस्यजीव
स्येश्वरपरितंत्रतयातस्याज्ञस्यतानतत्रगुणसंपादनासामर्थ्यात् नचकर्मणएवांतःकरणशुद्धिद्वारागुणपदार्थसाधन^
साधकत्वमस्त्वितिवाच्यंजडस्यकर्मणोपिस्वफलप्रदानेजीववदीश्वरमंतरेणानीशत्वात्तर्हीश्वरएवपरमकृपालु
त्वात्साधनज्ञानज्ञानप्रतियोगिसंपादयतुतत्रमध्यस्थोकिंनिष्कामकर्मणावातज्जन्ययाधीशुद्ध्यावाइतिचे
त्सत्यंसंपादयेदीश्वरोयदीच्छेत्तेनेच्छन्यतोनसंपादयतियत्किंचिदपिकर्मणाविना तदुक्तंकर्मसापेक्ष
त्वात् फलमतउपपत्तेरितिसूत्राभ्यामत्रहेतुत्वा तस्मादीश्वरनिर्पितस्यकस्यापिनकर्मफल
दातृत्वस्वार्पितनिष्कामधर्मफलदातृत्वमपितस्यैवमहाप्रभावस्यश्रीकृष्णस्यप
रमात्मनस्तत्राधिकारिणीतिसिद्धं ॥ ॥

सर्वत्र परमेश्वरप्रसादद्वारा साधनचतुष्टयसंपत्तिहेतुर्निष्कामधर्मानुष्ठानमावश्यकमित्युक्तं तत्र निष्कामधर्मस्य फलत्वेनाय
चित्तत्वनशंकानिरसनपरेश्वरपरितंत्रितोक्तान्यथापि तेन ज्ञानोत्पत्तौ हेतुत्वेन निरूपितः परमेश्वरः साधनसंपत्तिमुमुक्षोर्ज्ञानसाधनं सेवमान
साधनं ज्ञानं ददातीत्यभिहितमपि क्रमस्तु पूर्वं यथा ध्यानं नायेत्यादौ निरूपितः तत्रैव येऽवधानेन साक्षात्कारहेतुत्वः श्रवणादयः अंगा
निपहानिसिद्धये धिकारिणः प्रशंसनं वा तत्र शूयते विधिप्रत्यर्थवादः ग्रामेतिथ्यासारूपतादीयान नायेत्वात्वासमदभसग्नागीये इति
आत्मश्रवणेनायमधिकारी ज्ञानसिद्धो मोक्षसिद्धो वा भवति अत एव गुरुस्त्वत्वत्वव्यपदेशकर्तास्तु राणादेवीसपद्विषिष्ठानां
नायरेश्वरो मोक्षपदेन योजयतामोक्षसाधनज्ञानेवा ज्ञानसाधनज्ञानेवास्यादित्यर्थः पारसीकानां पीर पदं गुरुपदार्थकं त्र
यच भूतार्थवादः प्रमाणांतरविरोधरहितार्थवाचकत्वात् वज्रहस्तपुरन्दरत्यादिवर्थवादवत् इंद्रोहनायवज्रमुद्यच्छदित्या
दिवच्च ननु गुणवादः प्रमाणांतरविरोधसमर्थवादस्यैव गुणवादत्वात् यथा यजमानः प्रस्तर इत्यर्थविरोधात् गुणवादः

सुमणिपेमिद्वीपस्थानाय सुमणिपेयरत्नीयवलकाश सुमणिपेरीपलायपातालं ॥

नापत्तुविरोधमानान्तरावधारणार्थविषयत्वाभावात् यथाग्निर्हिमस्य भेषजमित्ययमवधारणार्थोपकृतत्वानुवादः तद्वक्तविरोधे गुणवादः स्यादनुवादो वधारितेर्भूमा
र्थवादलक्षणाद्यर्थवादस्त्रिधा मतस्तत्रार्थवादस्य त्रिविधात्वं सुमणिपेइति पुत्रस्यात्मश्रवणेनायमधिकारी भूमिर्भवति अत्र च भूमिरूपत्वमधिकारिणि
मानान्तरविरुध्यते तो भूमिवत्ततमागुणत्वात्तेन लत्मत इति गुणवादः यवलाकाशत्यनेन मंडपाकाशो वाच्यः मंडपाकाशेन च ब्रह्मांडाकाशो दिवलि
तः तथा च यथा ब्रह्मांडाकाशो जीवानां निवासस्थानं तथा श्रवणेन युक्तोधिकारी देवीसंपद्गुणानां निवासस्थानमित्यर्थः सुमणिपेइति समुद्रे
णाविस्तृतश्रावणे नो भूप्रदेशविशेषो द्वीपः तथा च यथा मुक्तागुणवता जलेन तो भूप्रदेशो द्वीपपदवाच्यः शोभते तथात्मश्रवणेन प्रयुक्तः शुद्ध
विशेषः मुक्तागुणप्रयुक्तैः शुद्धविशेषै राहतः शोभते तेनेत्यर्थः द्वीपवदालोकनेन शोभनं वायस्य मनुष्यत्वनिरस्तुचित्ततो पात्रयोग्यात् अथ
वा दीपलोयन्य स्व दीपतेचासौ लोकः दीपलोकोऽनतिरिक्तलाकः तथा च यथा सूर्यरश्मिभिर्दीप्यमानो नतिरिक्तलोकस्तथा यमधिकारी चात्मश्रवणेन सू
र्यरश्मितुल्याभिरात्मतत्त्वविचारविषयातः कर्णैः निर्मिदपमानस्त्वर्थः पातालपदेन तत्र स्थितमत्र गुणात्वत्वेन तथा च ब्रह्मविद्यायाभिमा

सुणिऐ इति आत्मब्रह्मश्रवणेन युक्तं कालेन व्यपोहति सः कालेन परिछेतुं न शक्यते ब्रह्मवेद ब्रह्मैव भवतीति श्रुत्या ब्रह्मरूप
ज.टी. त्वात्मस्येत्यर्थः ननु केवलश्रवणेन ब्रह्मवित्वमनुपपन्नं अन्यथा मननादिविधेयवैयर्थ्यस्यादिति चेत्र प्रतिबंधराहित्येन केवलश्र
३१ वणेनैव ब्रह्मवित्वस्योपपत्तेः प्रतिबंधराहित्यं च मननादिभिरतो न मननादिविधेर्वैयर्थ्यमिति तात्पर्यं ननु जगत्यस्मिन्नापातनो
पिकारिणामानंत्ये तत्र केषांचिन्नु शास्त्रान्तरेणादृशे श्रवणे प्रवृत्तिहेतुः सर्वदा प्रहर्षोपरप्रयाय प्रमोदो भवतीत्यपेक्षायामाह ॥
नानकेति पनानकपदवाच्यस्य परमेश्वरस्य भक्ता ये तेषामीश्वरेति रतिशयस्नेहिनां विशेषाधिकारिणामेनादृशे प्रशास्त्रे
ब्रह्मसाक्षात्कारहेतौ श्रवणे सदा नवाछिन्नप्रमोदपदवाच्यविकाशो भवति सूर्योदये सति सरसिकमलानामिवेत्यर्थः एवं श्रव
णे प्रवृत्तिहेतुमाशास्य निश्रेयकारणभक्तिं निरूपयेदानीं प्रकृतमनुसरति सुणिऐ इति अत्र दुःखपापशब्दाभ्यां कार्यकार

सुणिऐ पोहि न सकै कालु नानक भगता सदा विगासु सुणिऐ दूख पाप का नासु सुणिऐ ईसरु बरमा इंदु सु

णप्रपंचो यथाक्रमं विवक्षितः तथाच यथा दुःखहेतुपापस्य प्रायश्चित्तेन नाशः । णिऐ मुखि सलाहण मंद
तथा निखिलप्रपंच दुःखहेतुमूलाविद्याभूतमहत्पापस्य ब्रह्मात्मश्रवणेन नहि दोषि ब्रह्मसाक्षात्कारद्वारा नाश इत्यर्थः
सुणिऐ इति ईश्वरशब्देन रुद्रो ब्रह्मा उभाउच्यते तत्पदार्थत्वान योः तथा च यथा हरिहरयोर्जीवानां स्वाधीनतया नियोजयि
तृत्वं तथा यथादानि याहरूपाणामिंद्रियविषयाणां स्वाधीनतया नियोजयितृत्वं श्रवणेन विशिष्टस्याधिकारिणा इत्यर्थः
बरमेति प्रजापतिवत् सर्वत्र मर्यादा विवस्थापकत्वं तस्य बोध्यं इंदु वरप्रदहेतुत्वं ब्रह्मात्मश्रवणेन युक्तो मंदैरपि स्तु
तैरपि प्रसंगतो मुखे प्रथमं श्लाघनीयो भवति किमु वाच्यमुत्तमैः प्राज्ञैस्तस्य श्लाघनीयतेत्यर्थः अथवा मुखैः प्रथानै ३१
र्भूतैः श्लाघनीयो न मंदैस्तेषामज्ञातत्वात् अथवा मुखे मंदैः श्लाघनीय इत्यर्थः अथवा मुख्यानामदानां च
श्लाघाजनकत्ने समदृष्टित्वादित्यर्थः ॥

स्वगिरायेइति सएवयोगेनयोगाभ्यासेनहतिनिरोधरूनियतंजलिनासूत्रितेनयुक्तोभवति योगिनइववि नहतिसमाहितत्वमेपेत्योक्तं
ननुसुखोक्तंयोगयुक्तइतिभावः ननुभेदस्यप्रपत्रस्यपदेनसंज्ञानमात्रंविवक्षितं तथाचसंज्ञानादात्मभेदज्ञानयुक्तोभवेदित्यर्थः ॥
अत्रानेनयातंजलिमतसांख्यमतयोरप्यतिनहतिसमाहितत्वान्नात्मभेदज्ञानेनतद्रूपासाम्यतोक्ता स्वगिरायेइति शासनन्यनुपासनेतिशा
स्त्रेनचोभयात्मकेमीनुशासनात्मकमेकयानोयमजिज्ञासेत्यादि द्वितीयंतुब्रह्मानुशासनात्मकमयानोब्रह्मजिज्ञासेत्यादि ए
वंस्मृतिरप्यधर्मसंहिताच तत्रचमन्वादिभिरुक्तावा भगवतोऽर्जुनंप्रत्युपदेशादिरूपाहितद्वितीयानुनिष्प्रतीतानाकांडत्रयात्मे
कोवेदःकर्मपरवेदभागःकर्मकांडः उपासनपरः सउपासनाकांडः ब्रह्मज्ञानपरःसएववेदभागस्तुज्ञानकांडइति तथाचैव
लात्मश्रवणेनविशिष्टोयथाधिकारस्यधर्मंब्रह्मचानुशासनितयाधर्मंब्रह्मवास्मारयति क्रमेणाव्यवस्थयाचकर्मोपा

स्वगिरायेजोगजुगतिननभेद् स्वगिरायेशासनस्मृतिवेद स्वगिरायेसत्यमनोधज्ञान स्वगिरायेश्रवसवकासिनान

पासनात्मपदिशान्निजानमपीतिस्त्रितयरूपत्वंतस्यमहात्म्य \ स्वगिरायेपडपावेमान स्वगिरायेलागेसहजध्यान
नइत्यर्थः शोधंव्याख्यानपूर्वमितिनपुनर्व्याख्यायते ९ स्वगिरायेइति सत्यमनर्थानन्तुवैधियथार्थभाषणंसत्तोषोनामय
थालाभेदंशित्वप्रत्ययः ज्ञानंनदत्तुकूलानुष्टेयप्रतीतिः मन्वादिसर्वदसाधनज्ञानेब्रह्मात्मश्रवणेनवपुरुषश्रेष्ठस्यासि
द्धतीत्यर्थः स्वगिरायेश्रवसवकासिनानेति अनेनवासेनस्वरार्पितानिशिष्टाचाररूपाणीयधर्मशास्त्रोक्तानितीर्थादि
कर्माणियानितानुक्तश्रवणेनसार्थकानिभवंतीत्युक्तं एवसर्वत्रयथायोगमूहनीयं पडपडेति शास्त्राणांपुनःपुनरध्यय
नाद्ध्यायनाद्दायमानपदवाचांसत्कारंप्राप्नोतिसउक्तश्रवणेनस्वतोनिष्पद्यते तदंतर्भूतत्वात्तस्येत्यर्थः श्रवणेनयुक्तस्वस्वाभा
नात्ध्यायनाद्दायमानपदवाचांसत्कारंप्राप्नोतिसउक्त
वकमेवध्यानसंवद्धतरस्यतत्त्वार्थः अत्रचध्यानपदेनसाक्षात्कारलक्षणनिर्विकल्पसमाधिर्विवक्षितोनतुनिदिध्यासनंविषयस्य

सगुणियैइति सवंतिप्रयत्नेनागच्छंतीतिसदामेत्र्यादयोगुणास्तेषांसमदायःश्रवणादिविशिष्टैसिद्धातीत्यर्थः अथवाशरीरपातांतरे
जै॰टी शरीरपदंपारसीकानांकार्याकार्यनिर्णयपरं तथाचसम्यश्रवणेनविशिष्टःकार्याकार्यनिर्णयेगुणानांमैत्र्यादिभ्योविपरीतानांयाहोभ
२२ तकोविनाशकोभवतीत्यर्थः सगुणियैशेषइति आसिनवाकेसवाणीपारसीकदेशपदानिशेषपदंहननमप्रधानपुरुषविशेषप
रं तथाचप्रधानपुरुषविशेषाणांयेगुरवःराज्यास्तेषांराजानिराजतेसम्यश्रवणयुक्तःराज्यदियामत्वादितिसमदायार्थः सगुणि
यैअंधेति येविचारवतीबुद्धिनेविहीनास्तेषांसलोचनेनहत्वाभोतमार्गंब्रह्मविषयंज्ञानंसचप्रापयतीत्यर्थः इदानींब्रह्मात्म
साक्षात्कारद्वाराब्रह्मात्मश्रवणंमोक्षपर्यवसानंप्रदर्शयन्नुपसंहरति सगुणियैहाथइति तावन्मात्रमपरोक्षंयदद्वैतमात्मापानदर्शि
भिर्मरुभूमावुदकमिवनस्यतेनितेनतीतिश्रुतिसिद्धासर्वद्वैतनिषेधेब्रह्माद्वैतरूपावधिःपुरुषान्नपरंकिंचित्साकाष्ठाशाहेत।
सगुणियैसराग्रताकेगाह सगुणियैशेषपीरयान्यागाह सगुणियैअंधेयावहराह सगुणियैहाथहीवैअसगाह मनेकी
चोकात्मश्रवणेनोपपन्नस्यपुरुषस्यैरेयस्यभवतीतिश्रवणेकिंवाच्यम्।\ गतिकहीनजाय जेकोकहेपिछैपछुताहि ॥
शात्यमित्यर्थः ११ एवंश्रोतव्यवाक्यविहितंश्रवणंसूयेदानींतन्स्यंमननंसूयते मनेइति गम्यतइतिगुत्याणागतिःस्वरूपमुच्यते
तन्नतावन्मननस्यगतिर्नामस्वरूपंसद्रूपतयावासदसद्रूपतयावावक्तुंनशक्यतइत्यर्थः असन्मायाकार्यांतःकरणद्वतिविशेषत्वान्म
ननस्यतन्स्वरूपंसद्रूपतयावक्तुंनशक्यते सद्ब्रह्मविषयकत्वाद्सन्नितिव्यवहाराविषयत्वाच्चासद्रूपतयाभयोविरोधात्सदसद्रूप
तयापीतिभावः ननुकस्मिंश्चित्केनचिद्रूपेणतत्स्वरूपंवक्तुंशक्यंभविष्यतीत्यतआह जेकोइति यःकश्चित्पराममर्शात्पूर्वंमननस्वरूप २२
केनचित्सत्वादिरूपेणावृत्तिरूपपरामर्शादनंतरमयाकथितंवक्तुमशक्यस्यमननस्यस्वरूपमुक्तमितिपश्चात्तापंप्राप्नोतीत्यर्थः
ननुयद्यन्यःकोपिकेनापिरूपेणतत्स्वरूपंनजानातितर्हिभवद्भिरेवविचारेणवाच्यलेखनीयंचेदन्यज्ञानायमितिचेत्तत्राह ॥

कागरेति यत्रैतान्निवर्त्याचमननस्यकेनत्रिदूपेणलेनवक्तनर्नोऽनमवामोक्ष्यसीत्यनोविचारेणेति: श्रमपवेति भावः गूढाभिप्रा
येणशिष्यः पृच्छति श्रथुनामयोश्र्चहाल्लन्मितिभवादिनैर्वाच्यामितिज्ञाने यदिमननतस्यानदासात्ताकारः कण्डमुन्यस्यन्नश्रनोहम्य
हालः सत्पृछामिकिंमननमित्यर्थः समायते वहिकरनेति यत्रावस्थाविशेषोदैतनक्रनत्वतुकूलननतकोनुचिंतनतदूपविचारमुप
विणपासनेकुवेति विहासः सविचारपवमननमितितूमरत्यर्थः नतुकथमुक्तेसत्वादिरूपेणमननवक्तुनस्यासतइति भवाहैसा
मननस्योनत्वादितिचेत्तमयासत्वादिरूपेणमननमुक्तमपिनदैतन्नत्यनुकूलनकोनुचिंतनतदूपमननमात्रं नतुमननेसत्वादि
रूपेणवक्तुनशकानतइतिश्वमुक्तंनतुमननमपिवक्तुंनशक्यनइति श्रन्यथाश्रानिष्ठतस्यव्यपदेशानुपपत्तेरित्याशयंथं नतुयस्मा
दैतस्कानिरूपस्यशाहस्योक्तमननमनुकूलसशाद्ः किंनाहशोनवेतिचेतत्राह श्रैसाइति याहशमद्वैतशाब्दानुकूलमननस्यस्व

काकदकलननलिवगाहार मनेकावाहिकरनविचार श्रैसानामनिरंजनहोय जेकोमनजाणोमनकोय ॥

रूपमेताहशंनिरंजनस्यांजनशाहितास्तानतमोविरहितस्याद्वैतस्यब्रह्मणोनामस्वबोधकशब्दोपिभवति यत्तानुरूपावलिरिति्या
यादित्यर्थः श्रयंभावः यथाद्वैतविषयकश्रुतत्वानुकूलमननस्वरूपंसत्वादिरूपेणावक्तुनशक्यते तथानामपदवाच्याद्वैतश्रु
तिरपिसत्वादिरूपेणावक्तुनशक्यनइति नतद्वैतविषयकश्रुतेरनिर्वचनीयत्वेद्वैतस्याप्यनिर्वचनीयत्वमायातमितिचेन्नाद्वितीयब्रह्मणः
सत्वात्प्रतिपादिकायाः सत्यंज्ञानमनंतंब्रह्मेत्यादिश्रुतेसत्वाद्वः सत्पदस्थायत्तुभवस्यचसर्वजनप्रसिद्धस्यसर्वानुगतब्रह्म
सत्ताविषयस्वव्याकोपात् नहिसद्धलविषयजयासत्यश्रुतेरपिसत्वतेकथमनिर्वचनीयत्वमितिचेन्नतस्याश्रप्यनिर्वचनी
यात्ताननकल्पितसर्वजगदंतःपातित्वादितिविरामः नतूक्तमननस्यानिर्वचनीयत्वेप्राशस्त्यंनस्यादितिचेन्नप्राशस्त्यमन्यावादित्या
हजेकोइति यःकश्चित्साधनसंपन्नोधिकारीयद्दलात्माविषयंतकोनुचिंतनरूपमननंजानातिशास्त्रात् नस्यमननस्यपुरतोनान्यदधिकारिक
नमनात्मपरिशिष्टेनविषयंमननंकिमपीत्यर्थः श्रत्रमनत्वइतिवाक्यविहितस्यमननस्याधिकारिविशेषादिधर्मविशेषाद्यमननविधिसहकारि

ह्णीप्राशास्त्राह्यविनातद्गतिरिक्तमननस्यकिमपाद्धेननिषेधादिनिबोध्यं १२

मंनेकीगतिकहिनजायेत्याद्यस्यापरावस्थायोगम्यतेअनयामननात्मिति गतिर्नामस्तुतिःसाचमननसेपतयाकथयित्वानभवत्यप
ज॰टी रिमितत्वात्तस्याइत्यर्थः नतुकश्चित्कथयिष्यतीत्यतआह जेकोकहैपिछैपछुतायेति यःकश्चिद्कि मननस्तुतिंसंपूर्णवान्नुतपतिय
३३ श्चात्तापप्रपन्नोभवतिमननस्यस्तोतुमशक्येनमयाहठैवश्रमःकृतःप्रशंसापापइति नतुस्तुतेर्वक्ताशास्तांकश्चिल्लेखयिष्यतीत्यतआ
हकागदेति वह्निकलमप्रयुक्तमेवलेखनकर्तृत्वेनान्यथायतःप्रथमंपत्रमपार्थमितियतयावगम्यवक्तितःप्रचयगमनायलिपीकुरु
तेमननस्तुतिरूपस्यार्थस्येयतयावगम्यवक्तैवनास्तितस्मात्पत्रेणलेखनीचलेखकोपिकश्चिन्नभवतीत्यर्थः तर्हिप्रशंसाकर्तुम
शक्येमननेप्रहतिःकथंस्यादितिचेतत्राह मंनेकाइति उपविश्यासनेस्थितिमालम्ब्यविवेकिनःप्रहृत्यनुकूलंप्रशंस्यमननस्यप
रामर्शीकुर्वन्तीत्यर्थः अयंभावः इयतयावगम्यस्तोतुमशक्यमपियमननंयथाशक्तिस्वस्वबुद्धिमनुसृत्यलक्ष्यतेपुरुषविशेषपरीतिनम

मंनेसुरतिहोवैमनबुधि मंनेसगलभवणकीसुधि ॥

हस्यानुपपत्तिरिति यस्माअद्वैतश्रुतेरनुकूलंमननंतस्याप्रशंसाकीदृशीत्यतआह अैसानामेतिनिरंजनस्यशुद्धपरमात्मनोनामबो
धकशब्दोयेनाहृशापरिमितप्रशंसयोपपन्नोभवत्यद्वैतविषयकत्वसाम्यादित्यर्थः शेषंपूर्ववदिति १२ पुनःस्तूयतेमननंमंनेइति
अत्रसुरतिपदंध्यानपरंमननानंतरमाविर्भाव ततोमंनेनैवनिदिध्यासनवाक्याविहितध्यानंभवतीत्यर्थः एवंध्यानेप्रतिमननस्य
कारणत्वमुक्त्वासाक्षात्कारंप्रत्यपितदाह मनबुधिइति मनस्यतःकरणेपरोक्षज्ञानमपरोक्षज्ञानंवामननेनजायतइत्यर्थःमनइ
तिपदंव्यवहितमपिसुरतिपदेनाप्यन्वितंज्ञेयंसममेवतंसत् मंनेसगलेति सकलस्यनिखिलस्यभूतभौतिकस्यजगतोयत्कारणमेवतं ३३
तस्यसुधीर्मननेनभवतीत्यर्थः यद्वानिखिलानांभुवनानांब्रह्मणांकल्पनतयाधीर्मननेनेत्यर्थः यद्वाब्रह्मणोयत्सोपाधिकस्यनिखिल
रूपतयाभवनंतस्यसुधीर्मत्याभवतीत्यर्थः यद्वा ब्रह्मज्ञानिनितस्यरूपतयायप्याब्रह्मणोनिखिलस्यवध्याधारत्वेनतयधीर्मतेन

मंनैमुहिरिति नकीतुविंननत्ततोनाहैन अनन्यानुकूलेनमननेयुक्तोधिकारीमोक्षप्राप्तौमुखस्यद्वारस्यज्ञानेनैवभक्तैवल्यमिति
श्रुतिप्रसिद्धस्यज्ञानस्यप्रमेयासंभावनादिलक्षणानाडिनांनगछतीत्यर्थः अथवामननेनप्रपंचेब्रह्मसात्तात्कारमनरेण
नगलेमरनेमुखस्यप्रयानस्यपुरुषविशेषस्ययमस्यताडिनांककमंहेतुकामकामपिनिरस्करणारूपामाहत्त्तनपुरुषवनगछतीत्य
र्थः नत्रोकार्थंहेतुमाह मंनैजमइति कुतोयमकृतताडिनांनगछतिपतोमननेनयुक्तोयमेनयमदूतेनवासहैवनगछत्यतोयम
कृतताडिनांनैवप्राप्नोतीत्यर्थः पुनरपिप्रायेणभगवतायुक्तं पार्थनैवेहनामुत्रविनाशस्तस्यविद्यते नहिकल्याणकृत
कश्चिद्दुर्गतिंतातगछतीति ननुहेतत्अन्यपेतयानदनुकूलमननस्यकिमधिकंप्रशस्यमितिचेत्तत्राह ऐसाइति अथहेतत्राहाउकू
लेयादृशमननप्रशस्तं निरंजनस्याजनशाहिताज्ञाननत्तमोविरहितस्याद्वैतस्यब्रह्मणःपतादृशोदोयकंनामापिप्रशस्तंभवतितुल्यवि

मनेमुहिचोटानखाय मंनैजमकैसाथनजाय ऐसानामनिरंजनहोय जेकोमंनजाणैमनकोय मंनैमारगिठाकनपाय

षयत्वादित्यर्थः ननुयथाहैतविषयत्वसामान्यात्ताकःप्राशस्त्यंनपाब्रह्मविषयकमननात्अन्यविषयकमननस्यापिमतनत्व
सामान्यात्प्राशस्त्यंकिंनस्यादितिचेत्तत्राह जेकोइति अत्रकइत्यनेनाधिकारिणोदौर्लभ्यंसूचनेनतत्कृतमननस्यब्रह्मविष
यस्यापिदौर्लभ्यंसूचितंभवति तथाचयःकश्चिदधिकारीयद्ब्रह्मविषयंकंमननमनुष्ठेयंतयाजानातितस्यमननस्यपुर
तोन्यविषयकंमननंकिंतत्किमपिविशेषणाभेदमप्युक्तविशेषस्यापिभेदादित्यर्थः १३ फलप्रदर्शनेनमननंपुनः
स्तूयते मनैइति ब्रह्मविषयमननेनाभिनिविष्टोज्ञानमार्गस्यआवरणादेःकेनचित्कृतनप्रतिरोधनावाप्नोतिमार्गस्यज्ञानस्य
विचालनरूपायानानप्राप्नोतितस्यहृनदेवास्तनाभूत्यार्इशतआत्माह्येषांसभवतीतिश्रुतेरित्यर्थः देवामहाप्रभा
वाअपितस्यमोत्ताभवनायनेशतेकिमुतान्येदाद्वारइत्यर्थः १४ ॥

उक्तार्थे हेतुमाह मंनेइति अत्रयत्निपदं सम्मानपरं तथाच मननेन प्रपन्नस्य सर्वेषां प्रतिरोधकारिणां पुरतो ज्ञानमार्गस्य श्रवणादे
 र्गमोक्षमार्गस्य ज्ञानस्य सन्मानेन सत्कारेन यामहत्प्रकटता जायते भवति सर्वोपनिषदामहत्पनसत्यपरतयोपपादयन्सादरं श्रव
 णं प्रकटयति युक्त्यादिनाभिरूपनिषद्विरूपपादितमद्वयतत्त्वं मननं सत्कारेणाहतिभूताभ्यासरूपेण प्रकटयति प्रमाणासं
भावनाप्रमेयासंभावनादिनिवृत्तिफलकाभ्यां श्रवणमननाभ्यामनंतरं विपरीतभावनानिवृत्तिफलकं तैलधारावदविच्छिन्नप्रय
त्ननिष्पाद्यमद्वयतत्त्वविषयवृत्तिप्रवाहात्मकं निदिध्यासनमपि प्रकटीकृतेन सत्कारेण सहत्वच ज्ञानस्यतु प्रकटता सामग्रीवशात्प्र
यत्ननिष्पाद्या स्वसंवेद्या विद्यानिवृत्तिफलकापरोक्षरूपिता सत्कारश्च जीवन्मुक्तिसाधनयोर्मनोनाशवासनाक्षययोरभ्यासस्तेन
मननयुक्तेन क्रियत इति मननस्य परा स्तुतिरिति भावः स्तूणानिखननन्यायेनोक्तार्थमेव दृढयन्पुनर्मननं प्रशंसति मंनेइति अत्रमगपदंपंथ
मंनै पति सो प्रगट जाय मंनै मग न चलै पंथ मंनै धर्म सेती सनबंध ऐसा नाम निरंजन होय जे को मंन जाणै मन कोय मंनै पावै
परंमार्गपदर्थायं सन्नचलनपदं तु देहरीरीपन्यायेनोभयान्वितं मार्गपदं ज्ञानपदम्मो मोख दुआर मंनै परवारै साधार ॥
तपदशेषेणावर्नमानं यद्यज्ञानमार्गश्रवणादिमोक्षमार्गज्ञानं च तत्परतया भेदेनो व्याख्यायते तथाच मननेन निष्पन्नस्य ज्ञानमार्गश्रवणा
दिमुक्तिमार्गज्ञानं च साधनतः स्वरूपतः फलतश्च न चलत्यन्यथा संपद्यमानमन्यथा न भवतीत्यतरार्थः ननु जातस्य योनविचलन
मित्यपेक्षायां हेतुमभिनयति मंनेइति मननेन निष्पन्नस्य यतो धर्मेण ज्ञानमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति यज्ञेन दानेन
तपसानाशकेनेत्यादिश्रुत्या ज्ञानोद्देशेन विविदिषोद्देशेन वोक्तेन ज्ञानमार्गमुक्तिमार्गयोर्हेतुना पूर्वं संपादितेन दानेन तेन
नापि फलपर्यंतेन सह संबंध इत्यर्थः शेषं व्याख्यानप्रायमेवेति २५ ननु कः पुरुषविशेषोपदापरोक्षज्ञानं प्राप्नोति तदा किं करोति चे
त्तत्राह मंनेइति यदा तेनोक्तः पुरुषविशेषेण मोक्षद्वारमपरोक्षज्ञानं प्राप्यते तदा स हैव परवारपदवाच्यं ज्ञानसंप्रदायं शिष्यपरंपर

एतदेव पुनः स्पष्टयन्नुपसंहरति मनैइति सस्वयंज्ञानसाधनप्रभावनिष्पन्नेनमोक्षसाधनज्ञानोपायेनाज्ञानतत्कार्यरूपा
न्तरति शोकमोहमविदित्ति श्रुतौ शोकोपलक्षितानादनंतदुःखभूतादनादिकालकान्संसारसागरान्तरति परं पारं ब्रह्मानंदा
ख्यमोक्षमुपगच्छति स्वरूपतया पूर्वमपिनादृशः ब्रह्मैव सन् ब्रह्माप्येतीति श्रुतेः पुनः स्वयंगुरुः सन् शरणागतानशि
ष्यानपि मोक्षसाधनज्ञानप्रदानेनाचिरं तस्माच्छोकसंसारसागरात्तारयतीत्यर्थः स्वरूपभूतब्रह्मानंदमाप्तान्तरं किम

मंनैतरैतारैगुरुशिष्य मंनैनानकभवेनभिख ऐसानाम
निरंजनहोय जेकोमंनजाणैमनकोय ॥

भवतीत्यतआह मंनैनानकेति नानकपदवाच्यस्य सर्वोत्तरीत्या श्रुतेनस्यमननेनयुक्तो भिक्षुः मुमर्षीनप्रार्थयमानो
स्यां दुःखप्रायायां संसारदशायां पुनर्न भ्रमति भूयो न शोचति तत्र को मोहः कः शोक एकत्वमनुपश्यत इत्यादि श्रुतेरि
त्यर्थः १५ एवं श्रवणमननप्रशंसा सारूप्यमेव निदिध्यासनस्यापि प्रशंसा बोध्या तत्राप्यद्वैतवस्तुविषयत्वसामान्यात्
नंतु तत्राप्यपि श्रवणादिप्रशंसनवन्निदिध्यासनस्यापि प्रशंसनं सातात्त्वेनाभिहितं मंत्रभूतैः पद्यैरिति वेदयभिहितमे ॥

वक्षणापि निदिध्यासनप्रशंसनवन्मंत्रभूतपर्वविलोपनं श्रीगुरुभिराचार्यैर्हतमिति ज्ञायते किमत्र कारणमिति चेत् तत्र श्रवणा
ज॰री॰ दित्रितयविधायकवाक्यवत् तत्त्रितयप्रशंसापराणामपि मंत्राणां नियतसहचारित्वात् पूर्वं श्रीगुरुविरचिते तद्ग्रंथप्रच
३५ यगमनादनंतरं कदाचिद्विहितकाले कस्यचित्पुरुषविशेषस्य मरणं देहाद्वहिः प्राणनिःसरणलक्षणं कर्म परितन्त्रम
भवत् तत्रत्येन चिदेतस्य माहात्म्याभिज्ञेन मंत्रव्यूहरूपस्यास्य स्तवस्य पानमाचरितेन त्रिराचम्योपांशुजपं कृत्वा स्तोयपरितेना
भिमंत्रितजलसेचनं कृतं ततः स सततं तत्क्षणमेव सप्राण आसीद्यथापूर्वं व्यवह्रियमाणश्चेति पंचालीसर्वत्र प्रसरणमा
